International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2025; 2(4): 74-76
© 2025 IJMH
www.themultijournal.com
Received: 05-08-2025
Accepted: 13-08-2025
Publish : 14-08-2025

**डा.सुखदेवभट्टः**
सहायकाचार्यः,
संस्कृत एवं दर्शनविभागः,
रामकृष्ण मिशन विवेकानन्द शैक्षणिक-एवं शौध संस्थानम्, हावरा , बेलुर मठ

**Correspondence:**
**डा.सुखदेवभट्टः**
सहायकाचार्यः,
संस्कृत एवं दर्शनविभागः,
रामकृष्ण मिशन विवेकानन्द शैक्षणिक-एवं शौध संस्थानम्, हावरा , बेलुर मठ

# अनुपसर्जनात्सूत्रप्रयोजनम्

**डा.सुखदेवभट्टः**

**अवतरणम् –** अनुपसर्जनादि[1]ति सूत्रं स्त्रीप्रत्ययप्रकरणे तदन्तविधिं ज्ञापयति किन्तु ज्ञापनं तदा इव युक्तं भवति यदा तत्र ज्ञापकसोपानानि वैयर्थ्यं यत्किञ्चिदर्थकल्पनस्वांशे चारिताथ्यादीनि सर्वाणि भवेयुः। तत्र सूत्रस्य वैर्यथ्यं कथमिति विचार्य ततः तदन्तविधिः प्रस्तूयते । सम्प्रति सूत्रस्यास्य लघुशब्देन्दुशेखरदिशा विस्तरेण व्याख्यानं क्रियते।

**ज्ञापकत्वम् -** समासप्रत्ययविधौ प्रतिषेधः इति वचनात् स्त्रीप्रत्ययप्रकरणे तदन्तविधिः नास्ति प्रकरण-स्यास्य प्रत्ययविधित्वात्। तस्मात् असहायशब्दस्य उपसर्जनत्वाभावात् तादृशात् असहायात् एकस्मात् उपसर्जनरूपात् शब्दात् प्रत्ययविधेः निषेधार्थम् अनुपसर्जनाधिकारः इति वक्तुं न शक्यते। न कुत्रापि असहायस्य उपसर्जनत्वं प्राप्यते लोके। तस्मात् अधिकारोऽयं व्यर्थं सत् ज्ञापयति यत् स्त्रीप्रत्ययप्रकरणे तदन्तविधिर्भवतीति। तस्मादेव बहुधीवरी इत्यादिषु अन्नन्तादपि ङीप् भवति।

**स्वांशे चारितार्थ्यम् –** अनुपसर्जनात् इति सूत्राभावे उपसर्जनादपि प्रत्ययविधिः स्यात्, परन्तु सूत्रसत्त्वे उपसर्जनात् तद्विधिः न सम्भवति। असहायस्यापि उपसर्जनरूपेण दृष्टत्वात् नास्ति इदं ज्ञापकम् इति पूर्वपक्षिभिः आक्षेपः क्रियते। तथा हि ज्ञापकविरोधे प्रथमा शङ्का - ननु नद इव आचरति इत्यर्थे क्विपि सर्वापहारिणि लोपे ततश्च कर्तरि क्विपि तस्यापि लोपे "नद" इति टिदन्तात् अदन्तात् टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः इति सूत्रेण ङीपः प्राप्तौ सम्प्रति "नद" इति शब्दस्य नदसदृशाचरणकर्त्री इति अर्थेन उपसर्जनत्वात्, अनुपसर्जनात् इति वचनेन ङीपः निषेधः सेत्स्यति। एवम् अनुपसर्जनात् इति सूत्रस्य चारितार्थ्यात् ज्ञापकत्वं न स्यात्।

**सिद्धान्तः** तथा न, आचारक्विबन्तप्रकृतिककर्तृक्विबन्तानाम् अनभिधानमेव स्त्रियाम् इति तदन्तविधि-ज्ञापकभाष्यप्रमाणात्।एतेन स्त्रियाम् आचारक्विबन्तप्रकृतिककर्तृक्विबन्तानां प्रयोगाभावात् ङीपः प्राप्तिरेव नास्तीति तन्निषेधार्थम् अनुपसर्जनाधिकारस्य चारितार्थ्यं नास्ति। तस्मात् व्यर्थीभूय तत् ज्ञापकम् एवेति स्वीकर्तव्यम्।अपि च नदेति शब्दात् क्विपि क्विबन्तेन धातुत्वे ततो विहितस्य क्विपः आर्धधातुकं शेषः इति सूत्रेण आर्धधातुकत्वे अतो लोपः इति सूत्रेण आर्धधातुकोपदेशे अदन्तस्य नदशब्दस्य अन्त्यस्य अकारस्य लोपे अदन्तत्वाभावात् ङीपः प्राप्तिरेव नास्तीति स्पष्टम्। अत एवात्र ङीपः निषेधार्थं अनुपसर्जना-धिकारस्य आवश्यकता नास्ति। तस्मादपि इदं व्यर्थं सत् ज्ञापकम् एवेति स्वीकर्तव्यम्।

ज्ञापकविरोधे द्वितीया शङ्का ननु पञ्च स्त्रीगोव्यक्तयः धनं यस्येति विग्रहे तद्धितार्थोत्तरपदसमाहारे च इति सूत्रेण द्विगुसमासे गोरतद्धितलुकि इति समासान्ते टचि प्रक्रियया पञ्चगवधन इति जाते पञ्चगवेति अंशस्य द्विगुत्वात् द्विगोः इति सूत्रेण अथवा टचः टित्वात् टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः इति सूत्रेण ङीप् प्राप्नोति। तस्य व्यावृत्त्यै अनुपसर्जनाधिकारः सार्थकः। तस्मात् न ज्ञापकत्वम्।

**सिद्धान्तः** तथा न, पञ्चगवधनशब्दान्तर्गतस्य पञ्चगवेति अंशस्य परिष्कृतार्थवत्त्वाभावेन प्रातिपदिकत्वा-भावात् ङीप् न प्राप्नोति। तथा हि अर्थवत्सूत्रे परिष्कृतम् अर्थवत्त्वम् – एतत्संज्ञाफलभूतविभक्तीतरसम-भिव्याहारानपेक्षया लोकेऽर्थविषयकबोधजनकत्वम्।पञ्चगवेत्यत्र विभक्तीतरसमभिव्याहारापेक्षया अर्थात् धनेति उत्तरपदस्य अपेक्षया एव लोकेऽर्थविषयकबोधजनकत्वम्। तस्मात् तादृशस्य परिष्कृतस्य अर्थवत्त्वस्य अभावेन प्रातिपदिकत्वाभावात् न ङीप्। तस्मात् तन्निषेधार्थम् अनुपसर्जनाधिकारः नापेक्ष्यते।एतेनापि ज्ञापकता सिद्ध्यति।

ज्ञापकविरोधे तृतीया शङ्का अदन्तत्वाभावेऽपि अनडुहेत्यादीनां गौरादिगणपाठम् आश्रित्य ङीषः वारणार्थं प्रकृतसूत्रस्य आवश्यकत्वात् न ज्ञापकता। हलन्तानामपि अनभिधानम् इत्येतावतापि ज्ञापकत्वं न बहुशब्दात् बह्वादिभ्यश्च इति ङीषः वारणार्थं प्रकृतसूत्रम् इत्यपि स्वीकर्तव्यम्।

**सिद्धान्तः -**

तथा न, अनभिधानाभावे हि सति ङीबादीनां प्रसक्तौ तद्वारणार्थम् अनुपसर्जनाधिकारस्य अपेक्षितत्वेन सार्थकत्वात् ज्ञापकता न सिद्ध्यति। ततश्च भाष्यमतभङ्गापत्तिः। तदन्तविधिज्ञापकभाष्यस्य तात्पर्यम् अस्ति यद् तदन्तविधेः प्रतिबन्धकरूपाणि कार्याणि न स्युरिति।यतो हि कार्याणाम् अनभिधानम् इति कथनेन मूलमेव नाश्यते, तेन तदन्तविधिर्भवतीति सुतरां ज्ञायते।

ज्ञापकविरोधे पुनः युक्तिः - आपिशला ब्राह्मणी इति विचारः।

ननु आपिशलिना प्रोक्तम् इति विग्रहे तेन प्रोक्तम् इति सूत्रेण अण्प्रत्यये सुब्लुकि यस्येति च इति इकारलोपे आदिवृद्धौ आपिशलम् इति। ततश्च आपिशलम् अधीते इत्यर्थे आपिशलशब्दात् शब्दात् तदधीते तद्वेद इति सूत्रेण अण्प्रत्यये प्रोक्ताल्लुक् इति सूत्रेण अण्प्रत्यस्य लुकि आपिशल इति जाते अणन्तत्वात् ङीपः प्राप्तौ अनुपसर्जनाधिकारस्य आवश्यकता ।

**सिद्धान्तः** - इति चेत् न, अध्येत्रणः लुक्त्वात् अणन्ताभावे न ङीपः प्राप्तिः। ननु प्रोक्ताणः वर्तमानत्वात् ततः ङीप् भवतु सिद्धान्तः इति चेत् न, तस्य स्त्रियाम् अवर्तमान-त्वात्। अध्येत्रणः प्रत्ययलक्षणेन प्राप्त्या ङीप् भवतु।

**सिद्धान्तः** - तथा न, ङीपः निमित्तम् अणः अकारः, तेन वर्णाश्रये नास्ति प्रत्ययलक्षणम् इति वचनात् प्रत्ययलक्षणं न भवति, ततश्च सुतरां न ङीप्। अस्तु तर्हि, अध्येत्रर्थगतस्त्रीत्वम् आदाय प्रोक्ताणः ङीप् भवतु।

- **सिद्धान्तः** - अनुपसर्जनात् इत्यत्र गृह्यमाणविशेषणाङ्गीकारात् ङीपः निमित्तं स्त्रियां भवेत्। अत्र तु प्रोक्ताणः स्त्रीत्वे अवर्तमानत्वात् न ङीप्। एवं ङीपः प्राप्त्यभावे सति तन्निषेधार्थम् अनुपसर्जनाधिकारः नापेक्ष्यते इति सिद्ध्यति।
- ज्ञापकविरोधे पुनः युक्तिः - काशकृत्स्ना ब्राह्मणी[2] इति विचारः।

1) ननु यत्रास्ति प्रोक्ताणः स्त्रीत्वं तत्र भवतु ङीप्। यथा काशकृत्स्निना प्रोक्तां मीमांसाम् अधीते इति काशकृत्स्ना ब्राह्मणी इति स्थले ङीप् भवतु।

- **सिद्धान्तः** - काशकृत्स्निना प्रोक्ता मीमांसा इति विग्रहे[3] तेन प्रोक्तम् इति सूत्रेण अणि सुब्लुकि यस्येति च इति इकारलोपे आदिवृद्धौ काशकृत्स्न इति जाते अणन्तत्वात् ङीपी काशकृत्स्नी। ततः काशकृत्स्नीम् अधीते इति विग्रहे तदधीते तद्वेद इति सूत्रेण अणि प्रोक्ताल्लुक् इति सूत्रेण अण्प्रत्ययस्य लुकि लुक् तद्धितलुकि इति सूत्रेण लुकि अणि ङीपः अपि लोपे काशकृत्स्न इति जाते स्त्रियां विद्यमानात् प्रोक्ताणः पुनः न ङीप्, "लक्ष्ये लक्षणं सकृदेव प्रवर्तते" इति न्यायात्।
- **अनभिधानवादी शेखरः चिन्त्यः इति पूर्वपक्षः –**

1. ये तावत् आचारक्विबन्तप्रकृतिककर्तृक्विबन्तानाम् अनभिधानमेव स्त्रियाम् इति वचनम् अङ्गीकुर्वन्ति, तेषाम् अनभिधानवचनं चिन्त्यम्, द्वीयतेरप्रत्यये द्व इति प्राप्नोति, स्व इति चेष्यते इति तदोः सः सावनन्त्ययोः इति सूत्रस्थभाष्यप्रामाण्यात् आचारक्विबन्तप्रकृतिककर्तृक्विबन्तानां उपसर्जनत्वाभावात्। एवं भाष्यविरोधात् तद्वचनं चिन्त्यम्।

- **सिद्धान्तः** - तथा न, यावद्ब्रूयात्प्रधानादुत्पत्तव्यमप्रधानान्नेति तावदनुपसर्जनादीति प्रकृतसूत्रस्थभाष्यप्रामाण्येन इतरविशेषणत्वरूपार्थोपस्थापकरूपलौकिकोपसर्जनस्यैव अत्र ग्रहणात् आचारक्विबन्तप्रकृतिककर्तृक्विबन्तानाम् अनभिधानम् आवश्यकम्। अन्यथा अनुपसर्जनात् इत्यस्य ज्ञापकत्वं न स्यात्। तदोः सः सावनन्त्ययोः इति सूत्रस्थभाष्यस्य द्वीयतेरप्रत्यये इत्यादिकस्य तु एकदेशिभाष्यत्वात् नास्ति विरोधः।
- **व्यावृत्तिस्थलम् बहुकुरुचरा**

कुरुषु चरन्ति इति कुरुचराः। बहवः कुरुचराः यस्याम् इति विग्रहे बहुकुरुचरा इति स्थले तदन्तविध्यभावे ङीपः अप्राप्त्या अनुपसर्जनाधिकारस्य वैयर्थ्यम्। तत् व्यर्थीभूय तदन्तविधिर्भवति इति ज्ञापयति। ज्ञापितेऽपि तदन्तविधौ स्त्रियाम् इति न टितः विशेषणम्, तथा सति टिड्ढाणञ्द्वयसजित्यादिसूत्रस्य अर्थः स्त्रीलिङ्गे वर्तमानस्य टिदन्तस्य ङीप् स्यात् इति स्यात्।तदा टिदन्तस्य "कुरुचर" इत्यस्य स्त्रियाम् अवर्तमानात् ततः ङीप् न प्राप्नोति। तस्मात् सूत्रारम्भसामर्थ्यात् स्त्रियाम् इति प्रकृतिविशेषणम्। तदा बहुव्रीहौ अन्यपदार्थ-प्रधानत्वेन बहुकुरुचरशब्दस्य प्राधान्यात् स्त्रियां ङीप् प्राप्नोति तद्बाधनार्थम् प्रकृतसूत्रम्। तस्मादेव धीवानम् अतिक्रान्ता इत्यर्थे वन्नन्तान्तप्रकृतेः स्त्रियां विद्यमानत्वात् ङीप् रश्चान्तादेशः सम्भवति, ततश्च अतिधीवरी इति रूपं सिद्ध्यति।

- **अनुपसर्जनात् इति गृह्यमाणविशेषणम्**

आपिशलशब्दस्य अणन्तत्वेऽपि उपसर्जनत्वात् ङीप् न प्राप्नोति। अनुपसर्जनम् इत्यस्य गृह्यमाणविशेषणाभावे सति आपिशलेत्यस्य अणन्तत्वात् ङीप् स्यात्। तस्मात् शेखरकारेण उक्तम् "एवञ्चापिशलेत्याद्यप्यस्यैव व्यावर्त्यम्" इति। अर्थात् अनुपसर्जनाधिकारसामर्थ्यात् ङीबभावः।

- **सूत्रे तदन्तविधिः**

प्रकृतसूत्रे आदौ प्रत्ययग्रहणे यस्मात्स विहितस्तदादेः तदन्तस्य ग्रहणम् इति परिभाषया अणः अर्थः भवति अणन्ततदादेः। तस्य च प्रातिपदिकविशेषणत्वात् येन विधिस्तदन्तस्य इति पुनः तदन्तविधिना अणन्तान्तात् प्रातिपदिकात् इत्यर्थः लभ्यते। द्वितीयस्य तदन्तविध्यभावे सति अणन्तान्तात् प्रातिपदिकात् इत्यर्थः न स्यात्, समासप्रत्ययविधौ प्रतिषेधः इति वचनात्। परन्तु अनुपसर्जनाधिकारसामर्थ्यात् तदन्तविधिः भवति।

- **अणन्तान्तात् प्रातिपदिकात् इति स्वीकारे फलम्** - कौम्भकारेयः

कुम्भकार्याः अपत्यम् इत्यर्थे कौम्भकारेयः इति रूपम्। तथाहि कुम्भशब्दस्य अणन्तेन कारशब्देन सह तद्धितार्थोत्तरपदसमाहारे च

इति सूत्रेण द्विगुसमासे समासत्वात् प्रातिपदिकसंज्ञायां सुब्लुकि ङीपि कुम्भकारी इति।

कुम्भकार्याः अपत्यम् इत्यर्थे स्त्रीभ्यो ढक् इति सूत्रेण ढकि ढस्य एयादेशे ढकः कित्त्वात् आदिवृद्धौ कौम्भकारेयः इति रूपम्। प्रकृतसूत्रे अणन्तान्तात् प्रातिपदिकात् इत्यर्थाभावे अणन्तात् ढकि कार-इत्यस्मात् ढकि किति च इति सूत्रेण ढक् कार इत्यस्मात् विहितत्वात् तस्यैव आद्यचः वृद्धौ कुम्भकारेयः स्यात् न तु कौम्भकारेयः। तस्मात् प्रातिपदिकविशेषणम् अङ्गीकृत्य अणन्तान्तात् प्रातिपदिकात् इति अर्थः कार्यः।

1.ननु कुम्भकारी इति समस्तपदे समुदाये स्त्रीत्वस्य भानात् समुदायात् प्रत्ययः स्यादिति ततश्च इष्टं कौम्भकारेयः इति रूपम् उत्पद्यते।

• इति चेत् तथा वक्तुं न शक्यते, यतो हि यथा समुदायात् प्रत्ययः भवितुम् अर्हति तद्वत् अपर्याप्तिसम्बन्धेन कारशब्दादपि स्यात्। तेन कुम्भकारेयः इति स्यात् न तु कौम्भकारेयः।

2.कुम्भं करोतीति कुम्भकारी इति समस्तपदे पर्याप्तिसम्बन्धेन एकार्थीभावः। अवयवे तु न तथा, तस्मात् समुदायात् एव ङीप् इति द्वितीयस्य तदन्तविधेः न अपेक्षा।

• **सिद्धान्तः**, न तथा तद्धितार्थोत्तरपदसमाहारे च इति सूत्रेण पञ्चगवधनः इत्यादिषु उत्तरपदे परतः समासविधानात् समुदायैकदेशेऽपि एकार्थीभावः भवति इति ज्ञायते। एवं प्रकृतेऽपि कारशब्दात् यथा ढक् न स्यात् तदर्थः द्वितीयः तदन्तविधिः।

3.ननु कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणम् इति परिभाषया कारकपूर्वस्य एव ढक् तेन कुम्भकारशब्दादेव ढक् भवति। अतः अवयवात् ढकः वारणार्थं तदन्तविधिः नापेक्ष्यते।

• तथा न, कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणम् इति परिभाषा कृन्मात्रग्रहणे प्रवर्तते। अणः तु तद्धितेऽपि सत्त्वात् इयं परिभाषा प्रकृतसूत्रे न प्रवर्तते। तस्मात् कुम्भकारेयः[4] इत्यापत्तिं वारयितुम् अणन्तान्तात् प्रातिपदिकात् इत्यर्थः कर्तव्यः।

4.ननु तदन्तविधौ अपि व्यपदेशिवद्भावेन कारशब्दस्य अणन्तान्तत्वात् ढकि कुम्भकारेयः एव स्यात्। पुनः तदन्तविधौ सत्यपि समुदायात् ङीपि स्त्रीप्रत्यये चानुपसर्जने न इति परिभाषया अनुपसर्गे स्त्रीप्रत्यये तदादिनियमाभावात् कदाचित् कारीशब्दाद् ढकि कुम्भकारेयः स्यात्।

• न तथा, प्रकृताधिकारसामर्थ्यात् ज्ञायते असहाये एव व्यपदेशिवद्भावः भवति। कारीशब्दः ससहायः। तस्मात् अणन्तान्तत्वं वक्तुं न शक्यते।

• पुनश्च एतत्संज्ञाफलभूतविभक्तीतरसमभिव्याहारानपेक्षया लोकेऽर्थविषयकबोधजनकत्वम् इति अर्थवत्सूत्रोक्तार्थवत्त्वम्। विभक्तीतरसमभिव्याहारापेक्षया एव कार-इत्यस्य अर्थबोधकत्वं लोके दृश्यते। तस्मात् केवलं कार इति प्रातिपदिकं भवितुं नार्हति।ततश्च ङीप् न भवति।

• अपि च अनुपसर्जने स्त्रीप्रत्यये तदादिनियमाभावात् अधिकस्यैव कार्यं भवति इति उच्यते, अर्थात् प्रत्ययः यस्य अन्ते भवति तस्य कार्यं न तु यस्मात् प्रत्ययः विहितः।तत्रापि यदि व्यपदेशिवद्भावेन तदन्तविधिं स्वीकुर्मश्चेत् अनुपसर्जनात् इति सूत्रज्ञाप्यतदन्तविधेः वैयर्थ्यम्।तस्मात् प्रकृते कुम्भकार इत्यस्मात् समस्तात् एव ढक् भवति ततश्च कौम्भकारेयः इति इष्टं सेत्स्यति।

• **तदादिनियमस्य प्रयोजनं** - गार्ग्यायणः परमगार्ग्यायणः इति भाष्ये

• प्रत्ययग्रहणे यस्मात् स विहितः तदादेः तदन्तस्य ग्रहणम् इति परिभाषायाः फलं गार्ग्यायणः परमगार्ग्यायणः इति भाष्यवचनम्।

• गर्गस्य अपत्यं गार्ग्यः। गार्ग्यस्य अपत्यं गार्ग्यायणः इति। ततः परमश्चासौ गार्ग्यायणः इति विग्रहे परमगार्ग्यायणः इति रूपम् उत्पद्यते। अत्र तु एकदेशात् प्रत्ययः इति न सङ्गच्छते, तस्मात् तदर्थं प्रत्ययग्रहणपरिभाषया गार्ग्यशब्दादेव प्रत्ययः इति प्रयोजनं परिभाषायाः वक्तुमनुचितम्। तस्मात् अत्र एकदेशात् प्रत्ययोत्पत्त्यभावे प्रत्ययग्रहणपरिभाषायाः प्रयोजनम् इति कैश्चित् यदुक्तम् आसीत् तन्न सङ्गतम्।

• **परमगार्ग्यायणेति विषये नागेशमतम् -**

शेखरकारास्तु आह, तन्मते परमगार्ग्यस्य अपत्यम् इति अर्थे यस्मात् प्रत्ययविधिरित्यादिन्यायेन समुदायैकदेशात् फक् भवति। परमगार्ग्यशब्दस्य तु यञन्तत्वाभावात् यञिञोश्च इति सूत्रेण फक् भवितुं नार्हति।ततश्च प्रक्रियाकार्ये फकः फस्य आयनादेशे आद्यचः वृद्धौ परमगार्ग्यायणः इति सिद्ध्यति।तदा भाष्यकृद्भिः तदादितदन्तस्य प्रयोजनं गार्ग्यायणः परमगार्ग्यायणः इति यदुक्तम् आसीत् तदपि सङ्गतं भवति।

कैयटोऽपि भाष्यकारवचनम् एवं समर्थयति- "तदादिनियमावश्यकत्वप्रदर्शनाय परमगार्ग्यायण इत्युपन्यासः[5]" इति।

• **प्रत्याख्यानत्वं तु वार्तिककृतः अभिप्रायः न तु भाष्यकृतः**

सर्वादीनि सर्वनामानि इति सूत्रे अनुपसर्जनात् इति योगः प्रत्याख्यायते[6] इति यदुक्तं तत्तु वार्तिककारस्य मतम्। भाष्यकारेण तु तथा न स्वीकृतम् इति प्रदीपोद्यते विस्तरेण द्रष्टुं शक्यते ध्वनितश्च वदन्तीति[7] पदेन ।इति शम्।

**सन्दर्भग्रन्थसूची**


➢ प्रदीपोद्योतसहितं महाभाष्यम्,चौखम्बा सुरभारतीप्रकाशनम, 2021॥
➢ षड्व्याख्यासमन्वितः लघुशब्देन्दुशेखरः, चौखम्बासुरभारतीप्रकाशनम्॥
➢ नागेशभट्टरचितपरिभाषेन्दुशेखरः, भूतिभूषितः चौखम्बासंस्कृतप्रतिष्ठानम् 2012॥
➢ श्रीमद्भट्टोजिदीक्षितप्रणीतसिद्धान्तकौमुदी,तत्त्वबोधिनीबालमनोरमाशेखरभोषिता, चौखम्बासुरभारतीप्रकाशनम्, 2067॥
➢ भैरवीसहितशब्दरत्नसहितप्रौढमनोरमा, चौखम्बा संस्कृत सीरिज आफिस, 1992॥
➢ श्रीमद्भट्टोजिदीक्षितप्रणीतसिद्धान्तकौमुदी, लक्ष्मीव्याख्यासमन्विता मोतीलाल बनारसी दासः,1966॥


**सन्दर्भः**

1. अष्टा.4.1.14
2. लघुशब्देन्दुशेखरः,पृ.सं-546॥
3. लघुशब्देन्दुशेखरः,पृ.सं-545॥
4. प्रदीपोद्द्योतसहितं महाभाष्यम, पृ.सं-325॥
5. प्रदीपोद्द्योतसहितं महाभाष्यम, पृ.सं-325॥
6. प्रदीपोद्द्योतसहितं महाभाष्यम, पृ.सं-324॥
7. प्रदीपोद्द्योतसहितं महाभाष्यम, पृ.सं-325॥